# Dhanvantarikritam Vishnu Stotram

# धन्वन्तरिकृतं विष्णुस्तोत्रम्

## Document Information

Text title : Dhanvantarikritam Vishnu Stotram

File name : dhanvantarikRRitaMviShNustotram.itx

Category : vishhnu, vishnu, brahmapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 122/29-43||

Latest update : September 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 29, 2024

*sanskritdocuments.org*

# धन्वन्तरिकृतं विष्णुस्तोत्रम्

धन्वन्तरिरुवाच ।
जय विष्णो जयाचिन्त्य जय जिष्णो जयाच्युत ।
जय गोपाल लक्ष्मीश जय कृष्ण जगन्मय ॥ २९॥

जय भूतपते नाथ जय पन्नगशायिने ।
जय सर्वग गोविन्द जय विश्वकृते नमः ॥ ३०॥

जय विश्वभुजे देव जय विश्वधृते नमः ।
जयेश सदसत्त्वं वै जय माधव धर्मिणे ॥ ३१॥

जय कामद काम त्वं जय राम गुणार्णव ।
जय पुष्टिद पुष्टीश जय कल्याणदायिने ॥ ३२॥

जय भूतप भूतेश जय मानविधायिने ।
जय कर्मद कर्म त्वं जय पीताम्बरच्छद ॥ ३३॥

जय सर्वेश सर्वस्त्वं जय मङ्गलरूपिणे ।
जय सत्त्वाधिनाथाय जय वेदविदे नमः ॥ ३४॥

जय जन्मद जन्मिस्थ परमात्मन्नमोऽस्तु ते ।
जय मुक्तिद मुक्तिस्त्वं जय भुक्तिद केशव ॥ ३५॥

जय लोकद लोकेश जय पापाविनाशन ।
जय वत्सल भक्तानां जय चक्रधृते नमः ॥ ३६॥

जय मानद मानस्त्वं जय लोकनमस्कृत ।
जय धर्मद धर्मस्त्वं जय संसारपारग ॥ ३७॥

जय अन्नद अन्नं त्वं जय वाचस्पते नमः ।
जय शक्तिद शक्तिस्त्वं जय जैत्रवरप्रद ॥ ३८॥

जय यज्ञद यज्ञस्त्वं जय पद्मदलेक्षण ।

जय दानद दानं त्वं जय कैटभसूदन ॥ ३९॥

जय कीर्तिद कीर्तिस्त्वं जय मूर्तिद मूर्तिधृक् ।
जय सौख्यद सौख्यात्मञ्जय पावनपावन ॥ ४०॥

जय शान्तिद शान्तिस्त्वं जय शङ्करसम्भव ।
जय पानद पानस्त्वं जय ज्योतिःस्वरूपिणे ॥ ४१॥

जय वामन वित्तेश जय धूमपताकिने ।
जय सर्वस्य जगतो दातृमूर्ते नमोऽस्तु ते ॥ ४२॥

त्वमेव लोकत्रयवर्तिजीवनिकायसङ्क्लेशविनाशदक्षः ।
श्रीपुण्डरीकाक्ष कृपानिधे त्वं निधेहि पाणिं मम मूर्ध्नि विष्णो ॥ ४३॥

इति ब्रह्मपुराणे द्वाविंशाधिकशततमाध्यायान्तर्गतं
धन्वन्तरिकृतं विष्णुस्तोत्रं समाप्तम् ।

ब्रह्मपुराण । अध्याय १२२/२९-४३॥

brahmapurANa . adhyAya 122/29-43..

Proofread by PSA Easwaran

*Dhanvantarikritam Vishnu Stotram*

pdf was typeset on September 29, 2024

Please send corrections to *sanskrit@cheerful.com*